National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 187-189
© 2025 NJHSR
www.sanskritarticle.com

**लीलाधर शर्मा**
शोधच्छात्रः,
वेदवैदिकविज्ञानविभागः,
कविकुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक, नागपुरः

**मार्गदर्शकः**
**प्रो. हरेकृष्ण अगस्ती**
व्याख्याता, संकायप्रमुखः,
वेदविद्यासंकायः,
कविकुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक,नागपुरः

**Correspondence:**
**लीलाधर शर्मा**
शोधच्छात्रः,
वेदवैदिकविज्ञानविभागः,
कविकुलगुरु-कालिदास-संस्कृत-
विश्वविद्यालयः, रामटेक, नागपुरः

# सामवेदस्य शाखापरम्परायाः अद्यतनस्थितिः गानपद्धतीनां च समीक्षात्मकमध्ययनम्

## (A Critical Study on the Current Status of Samavedic Shakha Traditions and Singing Methods)

**लीलाधर शर्मा, प्रो. हरेकृष्ण अगस्ती**

**1.शोधसारम् –**

भारतीयज्ञानपरम्परायां वेदानां स्थानं सर्वोपरि विद्यते। **"वेदानां सामवेदोऽस्मि"** इति भगवद्गीतायाः वचनानुसारं सामवेदस्य विशिष्टं महत्त्वं वर्तते। प्रस्तुतशोधपत्रे सामवेदस्य वर्तमानकाले उपलभ्यमानानां शाखानां भौगोलिकविस्तारं, तासां विशिष्टाः गानशैली, तथा च सामवैदीय प्रकृति-विकृतिगानानां वैज्ञानिकं वर्गीकरणं विवेचितमस्ति। विशेषतः सामवैदीय कौथुमशाखा, राणायनीशाखा तथा जैमिनीयशाखानां क्षेत्रीयविस्तारः, सप्तविधगानानां (गायत्रं, आग्नेयं, ऐन्द्रं, पावमानं, अर्कः, द्वन्द्वं, व्रतम्, शुक्रीयं तथा महानाम्नीयं) स्वरूपं, तथा च आरण्यकगानस्य रहस्यमयत्वं अत्र सप्रमाणं प्रतिपादितम्। शोधपत्रमिदं सामवेदस्य लुप्तप्रायपरम्परायाः संरक्षणे, अध्ययने च नूतनदृष्टिं प्रदास्यति।

**मुख्यशब्दाः (Keywords):** सामवेदः, कौथुमशाखा, राणायनी, जैमिनी, सप्तगानानि, आरण्यकगानम्, प्रकृतिगानम्, विकृतिगानम्, सामगानशैली।

### १. प्रस्तावना (Introduction)

भारतीयसंस्कृतौ वेदाः न केवलं धर्मग्रन्थाः अपितु विश्वस्य प्राचीनतमं वाङ्मयं वर्तते। तेषु सामवेदः गीतात्मकत्वात् संगीतशास्त्रस्य आदिस्रोतः इति मन्यते। **"सामानि यो वेत्ति स वेद तत्त्वम्"** इति उक्त्या सामवेदस्य महत्त्वं स्वतः सिद्धं भवति। पतञ्जलिना महाभाष्ये **"सहस्रवर्त्मा सामवेदः**[1]**"** इति प्रोक्तम्, यद्यपि कालक्रमेण बहवः शाखाः लुप्ताः, तथापि अद्यतने काले तिस्रः प्रमुखशाखाः—कौथुम, राणायनी, जैमिनी च—भारतवर्षे विविधप्रान्तेषु सुरक्षिताः दृश्यन्ते। प्रस्तुतशोधप्रबन्धे एतासां शाखानां वर्तमानस्थितिः, भौगोलिकविस्तारः, तथा च सामगानस्य आभ्यन्तरसंरचनायाः (सप्तगानानां) गभीरा मीमांसा क्रियते।

### २. सामवेदस्य शाखानां अद्यतनभौगोलिकस्थितिः

**सामवेदीयशाखाः-**

ऋग्वेदीयसर्वानुक्रमणीव्याख्यायां “**सहस्राध्वा सामवेदः”** इत्युल्लिखतम् । अध्वाशब्देन देवता, गतिः, मार्गः, शाखाः इति एते सर्वे पर्यायशब्दाः सन्ति। महाभाष्यकारेण पतञ्जलिना “**सहस्रवर्मा सामवेद**” इति। सामवेदस्य सहस्रसंख्यकाः शाखाः भवन्ति इति प्रचोदितं। वर्मशब्दस्य शाखार्थत्वाभावादत्र गानपद्धतिभेदेन सहस्रधा भिद्यत इत्येवं दर्शयति। सामवेदस्य सहस्रशाखानां नामनिर्देशनं यत्र कुत्रापि न दृश्यन्ते। इतोऽपि ऋक्तन्त्रे “**वं नैगिरुस्थे”** इत्यनेन सूत्रेण नैगिशाखायाः ताण्ड्यब्राह्मणात् ताण्डि शाखायाः

उपलब्धिः ज्ञायते। सामतन्त्रस्य प्रथमं सूत्रं "**स्वरोऽनन्त्यः**" इत्यत्र सामवेदे स्वराणां सहस्रात्मकसूत्रेण बहुविधत्वप्रतिपादितत्वात् सामवेदस्य गानपद्धतिरेव अत्र गृह्यते, नान्यत्। सामतर्पणविधौ – "**राणायनी, शाट्यमुग्री, व्यासः, भागुरि, औलुण्डी, गौल्गुलवि, भानुमानौपमन्यवः, काराटिः, मशकगार्ग्यः, वार्षगण्यः, कुथुमः, शालिहोत्रः, जैमिनिः त्रयोदशैते मे सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः**" इति आचार्याणामुल्लेखः विद्यते । चरणव्यूहे –

**"राणायनी सात्यमुग्री दुर्वासा अथ भागुरिः ।**
**भारुण्डो गौल्गुलवीर्भगवानौपमन्यवः।।**
**दारासो गार्ग्य सावर्णी वार्षगण्यश्च ते दश।**
**कुथुमिः शालिहोत्रश्च जैमिनीयश्च त्रयोदश"**[2] इति वर्णितम्।

तत्रैव राणायनीयाः सप्तभेदाः भवन्ति राणायनीयाः, शाट्यमुग्राः, कालोपाः, महाकालोपाः, लाङ्गलायनाः, शार्दूलाः, कौथुमाश्चेति। एते सप्तसामगाचार्याः सामशाखाप्रवर्तकाः आसन्। इदानीं तु राणायनीय-कौथुम-जैमिनीयेति शाखात्रयं दृश्यते। पुराणेष्वपि कतिपय सामशाखानां नाम्नां उल्लेखः लभ्यते । तासां भौगोलिकविस्तारं, गानशैलीनां वैविध्यं च अधोलिखितरूपेण स्पष्टीकर्तुं शक्यते-

२.१ **कौथुमशाखा :** इयं शाखा वर्तमानभारते सर्वाधिकप्रचलिता अस्ति। अस्याः अनुयायिनः गुजरातः, कर्णाटकः, तमिलनाडुः, पश्चिमबङ्गालः, ओडीशा, उत्तरप्रदेशः, राजस्थानम् इत्यादिषु प्रदेशेषु निवसन्ति। अस्यां शाखायां प्रान्तभेदेन गानशैल्यां भिन्नता परिलक्ष्यते, या अधोनिर्दिष्टा अस्ति-

- **गुर्जरशैली :** गुजरातप्रदेशे प्रचलिता।
- **बङ्गशैली :** पश्चिमबङ्गालप्रान्ते अनुस्रियते।
- **द्राविड (मद्र) शैली :** तमिलनाडुप्रदेशे दृश्यते।
- **उत्कलशैली :** ओडीशाप्रदेशे प्रयुक्ता भवति।
- **काशीशैली :** वाराणसीक्षेत्रे (काश्यां) अस्याः प्राधान्यम्।

एतेन ज्ञायते यत् कौथुमशाखायाः मूलपाठः समानः चेदपि, 'प्रान्त-गानशैल्या' तत्र उच्चारणे स्वराङ्कने च सूक्ष्मपरिवर्तनानि कौथुमैः कृतानि सन्ति।

२.२ **राणायनीशाखा :** राणायनीशाखायाः विस्तारः कर्णाटक-आन्ध्रप्रदेश-महाराष्ट्र-उत्तरप्रदेश-राजस्थान-तमिलनाडु-केरळ-मध्यप्रदेश-हिमाचलप्रदेशेषु विद्यते। अस्यां शाखायां पाठभेदाः स्पष्टतया दृश्यन्ते। अस्याः शाखायाः सामगाः कौथुमशाखावत् अधिकाः न् सन्ति | यथा-

- सर्वेषु स्थानेषु प्रायः **कर्णाटकपाठः** गोकर्णपाठ अनुस्रियते।
- आन्ध्रप्रदेशे तु **गुर्जरपाठः**, **तूर्युपाठः**, तथा **ताम्रपर्णिपाठः** इति त्रयः भेदाः प्रचलिताः सन्ति। एषा विविधता राणायनीपरम्परायाः समृद्धिं सूचयति।

२.३ **जैमिनीयशाखा :** इयं शाखा मुख्यत्वेन दक्षिणभारते—केरळ, कर्णाटक, तमिलनाडु, आन्ध्रप्रदेशेषु तथा मध्यप्रदेशे—सुरक्षिता अस्ति। अस्याः शाखायाः जनाः अत्यल्पाः सन्ति | अस्यां शाखायां पाठद्वयं मुख्यं वर्तते-

- **केरळपाठशैली**
- **द्राविडशैली**

तत्र केरळपाठशैली अत्यन्तं विशिष्टा क्लिष्टा च वर्तते। केरळीय-जैमिनिशाखीयाः विप्राः श्रौतपरम्परासु, विशेषतः अग्निचयनादि-यागेषु, अतीव निपुणाः भवन्ति। एषां गानपद्धतिः अन्यशाखाभ्यः भिन्ना गम्भीरा च अस्ति।

**३. सामवेदस्य गानसंरचना (Structure of Samavedic Ganas)**

सामवेदस्य आधारः 'आर्चिकसंहिता' वर्तते। ऋक्-मन्त्रेषु गानस्य संयोजनं कृत्वा 'साम' निर्मीयते। एतत् गानं मुख्यतया द्विविधम्- १. **प्रकृतिगानम्** (यत् पूर्वार्चिकमाश्रित्य गीयते) २. **विकृतिगानम्** (यत् उत्तरार्चिकमाश्रित्य गीयते - ऊहः ऊह्यं च)

**३.१ सप्तगानात्मकः सामवेदः** सामप्रदायम् अनुसृत्य, विशेषतः नारदीयादीनां ग्रन्थानां प्रमाणेन, सामवेदः "सप्तगानात्मकः" इति प्रसिद्धः। तदुक्तं प्राचीनैः-

**"गायत्रं प्रथमं गानं आग्नेयं तु द्वितीयकम् ।**
**तृतीयमैन्द्रगानस्यात् पावमानं चतुर्थकम् ।।**
**अर्कद्वन्द्वव्रतश्चेति त्रीणि पर्वाणि पञ्चमम् ।**
**षष्ठं च शुक्रियं गानं महानाम्नी च सप्तमम् ।।**
**इत्येवं सामवेदस्य सप्तगानमितीरितम्"** ।।[3]

एतस्य श्लोकस्य विश्लेषणं, गानभेदानां विवरणं च अत्र प्रस्तूयते-

**1. गायत्रगानम्**

"गायन्तं त्रायते इति गायत्रम्" - इति व्युत्पत्या, तथा च गायत्रीछन्दसि निबद्धत्वात् अस्य 'गायत्रम्' इति संज्ञा। इदं चतुर्विंशत्यक्षरात्मकं साम भवति। अस्य ऋषिः परमेष्ठी प्रजापतिः, छन्दः गायत्री, देवता च सविता अस्ति। प्रकृतिगाने एतत् प्रथमं गानं मन्यते।

**2. आग्नेयगानम्**

अस्मिन् भागे अग्निदेवतात्मकानां मन्त्राणां बाहुल्यं वर्तते। "**अग्न आयाहि वीतये**"[4] इत्यारभ्य "**यद्वा उ**"[5] पर्यन्तं ११४ मन्त्राः अग्निदेवताकाः सन्ति। एतान् ऋक्-मन्त्रान् आधारीकृत्य १८० सामानि विहितानि सन्ति। पूर्वार्चिकस्य प्रथमोऽध्यायः पूर्णतया आग्नेयगानात्मकः एव अस्ति।

**3. ऐन्द्रगानम्**

इन्द्रदेवतासम्बद्धत्वात् इदं 'ऐन्द्रम्' इति उच्यते। पूर्वार्चिकस्य द्वितीयाध्यायस्य "तद्वोगाय[6]" ऋचमारभ्य चतुर्थाध्यायस्य "तव त्यन्नर्य[7]" पर्यन्तं याः ऋचः सन्ति, ताः आधारीकृत्य इदं गानं प्रवर्तते।

- **सांख्यिकी :** ऐन्द्रकाण्डस्य मन्त्रसंख्या २५२, तथा च सामसंख्या ६३३ अस्ति।
- **छन्दोवैविध्यम् :** अत्र गायत्री, बृहती, त्रिष्टुप्, अनुष्टुप्, जगती, उष्णिक्, ककुप्, पंक्तिः, द्विपदा, अत्यष्टिः इत्यादीनि विविधानि छन्दांसि प्रयुक्तानि।

• **विभागः :** ऐन्द्रगाने 'इन्द्रपुच्छम्' इति एकः विशिष्टः विभागः अस्ति, यः सोमसामतः (क्रोशम्-६५२) आरभ्य तावत्यन्ना (ऐन्द्रम्-८१३) पर्यन्तं विस्तृतः अस्ति।

**4. पावमानगानम्**

अस्मिन् पर्वणि 'पवमानसोम' देवतायाः स्तुतिः क्रियते। पूर्वार्चिकस्य पञ्चमाध्यायस्य "उच्चा ते" मन्त्रमारभ्य "य उस्रिया" पर्यन्तं ऋचः अत्र समाविष्टाः।

• मन्त्रसंख्या : ११९

• गानसंख्या : ३८४ अत्र यवमध्या-गायत्रीछन्दसः प्रयोगः अपि दृश्यते। आहत्य ग्रामगेयगाने (प्रकृतिगाने) ११९८ सामानि परिगणितानि सन्ति।

**5. अर्क-द्वन्द-व्रतानि (आरण्यकगानम् : रहस्यं सिद्धान्तश्च)**

प्रकृतिगानस्य द्वितीयः मुख्यः भागः 'आरण्यकगानम्' अस्ति। "अरण्ये गेयत्वात् आरण्यकम्" - अर्थात् एतानि सामानि ग्रामाद् बहिः अरण्ये, एकान्ते, पवित्रे वातावरणे एव गेयानि आसन्। अत एव एतेषां 'रहस्यगानम्' इति नामान्तरम्। खादिरगृह्यसूत्रे रुद्रस्कन्दस्वामिना उक्तम्- "अर्कद्वन्द्वव्रतानि छान्दसानि त्रीणि पर्वाणि अध्यापयीत"। [२]

आरण्यकगाने पञ्च पर्वाणि भवन्ति-

1. **अर्कपर्व :** अत्र साम्नां नामसु 'अर्क' शब्दः श्रूयते। उदा- स्वाशिरामर्कः, प्रजापतेरर्कः, इन्द्रस्यार्कः, अर्कशिरः, अर्कग्रीवः, वरुणगोतमयोरर्कः, अर्कपुष्पम् इत्यादयः।

2. **द्वन्द्वपर्व :** अत्र सामानि युग्मरूपेण (In pairs/duals) भवन्ति। उदा- वसिष्ठस्य प्राणापानौ द्वौ, इन्द्रस्येन्यौ द्वौ, प्रजापतेव्रतपक्षौ द्वौ, इन्द्राण्या उल्वजरायुणी द्वे, बृहस्पतेर्बलभिदी द्वे, शफौ द्वौ, शुक्रचन्द्रे द्वे इत्यादीनि। एतत् द्वन्द्वं जागतिकद्वैतस्य (Dualism) प्रतीकं मन्यते।

3. **व्रतपर्व :** अस्मिन् पर्वणि 'व्रत' शब्दयुक्तानि सामानि सन्ति। अस्य अपरं नाम 'वाचो व्रतपर्व' इति। उदा- कर्षशयस्य व्रतम्, प्राजापत्यस्य व्रतम्, सोमव्रतम्, विष्णोव्रतम्, महाव्रतसम्बद्धानि सामानि अत्र अन्तर्भवन्ति।

**६. शुक्रियपर्व**

शुक्रः अर्थात् आदित्यः (सूर्यः)। अस्मिन् पर्वणि सूर्यदेवतापरकाणि सामानि सन्ति। यथा- अग्नेव्रतम्, आदित्यव्रतम्, सूर्यस्य भ्राजाभ्राजे द्वे।

७. **महानाम्नीपर्व :** इदं आरण्यकगानस्य परिशिष्टभागः, यद्यपि सप्तगानेषु अस्य पृथक् गणना अस्ति। "विद्मा मघवन्", "इन्द्रं धनस्य" इत्यादिषु ऋक्षु गीयमानानि 'शक्वर्यः' वा 'महानाम्न्यः' सामानि अत्र सन्ति।

**५. परिशिष्टगानानि शाखान्तरसामानि च**

सामवेदे उपर्युक्तसप्तगानानां अतिरिक्तमपि कानिचन विशिष्टानि सामानि परम्परायां दृश्यन्ते, यानि परिशिष्टत्वेन स्वीक्रियन्ते।

• **उद्धयामे साम :** अस्य मूलं न ऋचि, नापि स्तोभपाठे लभ्यते, तथापि "वेदादिवेदान्तानि..." इति मन्त्रेण सह अस्य गानं विहितम्।

• **भारुण्डसाम :** छलाक्षरगणनायाः आधारेण अस्य ग्रहणं भवति। पक्षिणां रक्षणार्थं, विषनाशनार्थं च अस्य प्रयोगः परम्परायां श्रूयते।

• **तवश्यावीयम् :** खादिरगृह्यसूत्रे रुद्रस्कन्दः स्पष्टयति यत् "गायत्रस्य स्थाने तवश्यावीयम्" प्रयोक्तव्यम्। केचन आचार्याः इदं 'इलान्दं पञ्चानुगानम्' इति मन्यन्ते, अपरे तु 'शाखान्तरस्थम्' इति वदन्ति।

**६. उपसंहारः (Conclusion)**

इत्थं सामवेदस्य अद्यतनस्थितिः यद्यपि पूर्ववत् विशाला नास्ति, तथापि कौथुम-राणायनी-जैमिनीय शाखाभिः सा सुरक्षिता वर्तते। गुजरात-बङ्गाल-द्राविड-उत्कलादि शैलीभिः अस्य गानवैविध्यं अद्यापि जीवन्तम् अस्ति। गायत्रादि-सप्तगानानां वैज्ञानिकं विभाजनं ऋषीणां सूक्ष्मदृष्टिं प्रकटयति। प्रकृतिगानं (ग्रामगेयम्) यत्र यज्ञादिषु साक्षात् उपयुज्यते, तत्र आरण्यकगानं आध्यात्मिकसाधनायै, रहस्यविद्यायै च विहितम्। अर्क-द्वन्द्व-व्रतादि पर्वाणि सृष्टेः गूढतत्त्वानि सांगीतिकमाध्यमेन प्रकाशयन्ति। अतः, एतासां शाखानां, गानपद्धतीनां च संरक्षणं, तथा च लुप्तप्रायपरम्पराणां (यथा विशिष्ट-राणायनीपाठानां) पुनरुद्धारः अद्यतनीयानां शोधच्छात्राणां परमं कर्तव्यं वर्तते।

**सन्दर्भग्रन्थसूची (Bibliography)**


१. **सामसर्वानुक्रमणिका**

२. **खादिरगृह्यसूत्रम्,** प्रकरणम् - २.५.३४, मैसूरु विश्वविद्यालयप्रकाशनम्।

३. **पुष्पसूत्रम्,** (वररुचिकृतम्), अध्यायः ७, सूत्रम् ६.२२, निर्णयसागरप्रेस, मुम्बई।

४. **सामवेदसंहिता** , सातवलेकर, श्रीपाद दामोदर, स्वाध्याय मण्डल, पारडी।

५.सामवेदीय प्रकृतिगानं , संपादकप्रकाशकश्च – डा गिरिजाप्रसाद षडङ्गी - २०२०


**सन्दर्भ**

1. पतञ्जलिः महाभाष्ये
2. चरणव्युहे
3. सामवेदीय सर्वानुक्रमणिका
4. साम 1.1.1.
5. साम १८०
6. साम १८१
7. साम ८१३